 ISSN 976-8645

# शिक्षणे कठोपनिषदो भूमिका

विजेन्द्रकुशवाहा[९३]

आधुनिकयुगे नैरन्तर्यानुकूलधर्मावच्छिन्नपरिवर्तनं वरीवर्त्ति सर्वविधक्षेत्रेषु। प्राचीनत्वजिहीर्षयेदानीन्तनकालीना शिक्षा नरीनृत्यति नितराम्। किन्तावदस्मिन्त्वरायुगे **अनर्वाचीनन्यासधाररिण्युपनिषच्छिक्षोपकारिणी** भविष्यति न वेति जिज्ञासोदयादयन्निबन्धोनिस्तार्यतेऽत्र कठोपनिषन्माध्यमेन। आदौ प्रतिपित्सेयं यच्छिक्षा केति ? प्रतिपित्सायामस्यान्नैके विचारा विचरन्ति पुरतः। तत्रादौ भगवता पाणिनिनाऽवोचि **शिक्ष् विद्योपादाने**[१] **इति। शिक्ष्धातोरप्रत्यये**[२] कृते निष्पन्नश्शब्दोऽयं महान्। आङ्गलभाषायां शिक्षा शब्दः"**Education**"[३] इति उच्यते। "**शिक्षेत्यादि श्रुतेरङ्गम्**[४]" इति अमरकोषे। शिक्षायै "**तालीम**[५]" शब्दः अरबीभाषायां प्रयुक्तः। एष एव शिक्षाशब्द आत्मविस्तारेण भूमिं पवित्रिकृत्य नवनवोन्मेषशालिज्ञानकुसुमैनिर्माति मधुमयवातावरणम्। शिक्षैषा त्रिधा[६] विभज्यते आधुनिकविदग्धैरौपचारिकाभिकरणानौपचारिकाभिकरणनिरौपचारिकाभिकरणभेदात्।

शिक्षायामभिकरणस्य महत्यावश्यकता वर्तते। यस्य साहाय्येन सम्पूर्णशिक्षाकार्यस्य सिद्धिः भवति तदेव अभिकरणम्। येन माध्यमेन शैक्षिकगतिविधयः प्रचलन्ति तद् माध्यममेव शिक्षायाः साधनम् अभिकरणं वा भवति।

बी. डी. भाटिया[७]– समाजेन शैक्षिककार्याणि कर्तुम् अनेका संस्थाः स्थापिताः वर्तन्ते, ताः संस्था एव शिक्षायाः साधनानि भवन्ति इति।

शिक्षाक्षेत्रे प्राधानतया त्रिविधानि अभिकरणानि सन्ति। तद्यथा–

१.औपचारिकमभिकरणम्।
२.अनौपचारिकमभिकरणम्।
३.निरौपचारिकमभिकरणम्। इति।

१. **औपचारिकमभिकरणम्**– येन माध्यमेन नियमितरूपेण पूर्वयोजनाया वा शिक्षाप्रक्रियायाः आयोजनं क्रियते तत् माध्यमम् औपचारिकम् अभिकरणं भवति।यथा–

(a)विद्यालयः
(b)धार्मिकसंस्थाः
(c)पुस्तकालयः
(d)संग्रहालयः
(e)व्यायामशालाः

२. **अनौपचारिकमभिकरणम्**– येन माध्यमेन अनियमितरूपेण पूर्वयोजनां विना वा शिक्षाप्रक्रियाया आयोजनं क्रियते तत् माध्यमम् अनौपचारिकम् अभिकरणं भवति। यथा–

---

[93] शोधच्छात्रः श्रीसदाशिवपरिसरः पुरी,

(a)परिवार:

(b)समाज:

(c)क्रीडाङ्गणम्

(d)आकाशवाणी

(e)दूरदर्शनम्

३. **निरौपचारिकमभिकरणम्-** येन माध्यमेन औपचारिक-अनौपचारिकयो: अभिकरणयो: यथावश्यकं सम्मिश्रणेन शिक्षाया: आयोजनं क्रियते तत् माध्यमं निरौपचारिकम् अभिकरणं भवति।यथा-

(a)पत्राचारपाठ्यक्रम:

(b)जनसंचारसाधनानि

(c)चलनचित्रगृहम्

(d)मुक्तविश्वविद्यालय:

(e)संगणकयन्त्रम्

वर्तमानकाले सर्वेषु विद्यालयेषु संगणकाद्युपकरणानां प्रयोग: क्रियते। सर्वकार: अपि अस्य कृते धनस्य अतिरिक्तव्यवस्थां सम्पादयति। अभिकरणै: असंख्यबालका: शिक्षां प्राप्य स्वजीवनं विकचीकुर्वन्ति।

**शिक्षा एका त्रिध्रुवीयप्रक्रिया-**

त्रिध्रुवीयप्रक्रियायां बालकशिक्षकपाठ्यक्रमा: समागच्छन्ति। येन माध्यमेन शिक्षा विकासमभ्युपैति।

१. **बालक:**- बालकं विना शिक्षक: शिक्षकं विना बालक: पूर्णतां न प्राप्नोति। शिक्षक: बालकस्य जीवनमलङ्करोति। समाजे विभिन्नबालकस्य बुद्धि: समाना न भवति। कोऽपि बालक: अतिबुद्धिमान् कोऽपि च जडबुद्धियुक्त: भवति। बुद्धिमता बालकेन पाठ्यक्रम: झटिति ज्ञायते। अल्पमेधस: बालक: विलम्बेन पाठं गृहणाति। बालकस्य स्तरं ज्ञात्वा पाठ्यक्रमस्य निर्माणं तथा विद्यालयस्य निर्माणं पृथक् भवितव्यम्। परञ्च अद्यपर्यन्तं न तु बालकस्य चयनं न स्तरानुगुणपाठ्यक्रमस्य निर्माणं जातम्। शिक्षाप्रक्रियायामयं महान् दोष: समुपलभ्यते।

२. **शिक्षक:** - राष्ट्रस्य निर्माता शिक्षक:। बालकं विना शिक्षक: अपूर्ण:। शिक्षक: बालकानां स्तरं ज्ञात्वा पाठयन्ति चेदुत्तम:। शिक्षकस्य दायित्वं बालकानां पाठनमुत्साहवर्धनंप्रेरणाश्च। यदि बालकानामुत्साहवर्धनं क्रियते तर्हि ते उत्साहवर्धनेन कार्यं सम्पादयेयु:।

३. **पाठ्यक्रम:-** आधुनिकमनोवैज्ञानिके युगे विषयकेन्द्रितपाठ्यचर्याया: स्थाने बालकेन्द्रितपाठ्यचर्या: स्वीकृता:। पाठ्यचर्या प्रयोगाधारिता भवेत्। प्रयोगमाध्यमेन बालकानां चिन्तनशक्तीनां विकासो जायते। जीवनमग्रे प्रसारयितुं साहाय्यं क्रियते पाठ्यक्रमै:। भवतु तावत्।

**इदानीं कठोपनिषत्संकेतयति विषयोपस्थापनाय।**

कठोपनिषदि यमसदृशस्य[८] आचार्यस्य वर्णनं मिलति। प्राचीनकाले यत् स्थानमाचार्यस्यासीत् तदेव स्थानमिदानीं शिक्षकस्य। परन्तु आगते काले शिक्षकच्छात्रयो: सम्बन्धश्शैथिल्यमगात्। वर्तमानानुगुणं शिक्षणं भवेत् किन्तु मानवीयमूल्यं सम्प्रधार्यैव। कठोपनिषदि अपिच्छात्रस्य जिज्ञासावर्धनाय मानवीयमूल्यानां रक्षणाय आचार्यै: विभिन्नोपाया: परिकल्पिता:। किञ्च अत्र पाठ्यवस्तुरूपेण आत्मज्ञानं नाम ब्रह्मज्ञानं विराजते। ब्रह्मज्ञानसदृशगभीरविषयोपस्थापनं मनोरमशैल्या आचार्ययमेन कृतम्। इदं शिक्षारत्नमधुनाऽपि प्रासङ्गिकमेव।

एतदेव समासेनोपस्थाप्यते कठोपनिषद्दिशा– वाजश्रवा यज्ञं सम्पादयामास। यज्ञान्ते दक्षिणा समर्प्यते ऋत्विग्भ्यः। कालस्य कुटिलगत्या वाजश्रवा अनुपयुक्तगोदाने प्रवृत्तः। तस्यैव कश्चित् सुकुमारबालको नचिकेता श्रद्धावेशादचिन्तयदेताः गावः अनुपयोगिन्यो विद्यन्ते। एतांसा दानेन को लाभः? अत्र अस्मान् शिक्षयति उपनिषद्। यद्यपि नचिकेता बालकस्तथापि विवेकवान् । सः पुण्यापुण्यविषये चिन्तयति।अत एव तेन अवोचि–

**पीतोकदा जग्धतृणा दुग्धदोहा निरिन्द्रियाः।**
**अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत्**[९]।। (१.१.३)
**स होवाच पितरं तत कस्मै मा दास्यसीति ।**
**द्वितीयं तृतीयं होवाच पितरं मृत्यवे त्वा ददामीति**[१०]।।(१.१.४)

यमस्य नाम श्रुत्वैव जनाः कम्पन्ते, परन्तु नचिकेता सधैर्यमात्मचिन्तनं विधत्ते।

**बहूनामेमि प्रथमो बहूनामेमि मध्यमः।**
**किं स्विद्यमस्य कर्त्तव्यं यन्मयाद्य करिष्यति**[११]।।१.१.५

अत्र नचिकेतसो धनात्मकचिन्तनमागच्छति पुरतः। सोऽचिन्तयत् – मया तु निकृष्टमार्गानुसरणन्न कृतङ्कदापि तथापि पित्रा अभाणि– **मृत्यवे ददामीति**। भविष्यति किमपि कर्त्तव्यं यस्य पालनं मया पिता कारयिष्यति । प्रायः कक्षायां छात्राः द्विविधा भवन्ति– धनचिन्तनयुक्ताः ऋणचिन्तनयुक्ताश्च। तत्र वयं प्रकृतोदाहरणमाध्यमेन छात्राणामृणचिन्तनस्य परिवर्तनं धनात्मकचिन्तनेन कर्त्तुं प्रभवामः। तेनच्छात्राणां वर्धनं तीव्रेण भवितुमर्हति। अपि च इदानीं छात्रेषु कुसमायोजनं दृश्यते तत्र कारणं तेषां चिन्तनमेव। यथा वयं संसारं पश्यामस्तथैव छायाप्रति मस्तिष्के समापतति। अत उर्ध्वचिन्तनेनच्छात्राणामस्माकञ्च महान् लाभः। एतदेव प्रकृतप्रसङ्गः उपस्थापयति। अग्रे च – नचिकेतसः पिता शोकग्रस्तो जातः पुत्रदानकरणात्। अत्रापि नचिकेतसो भूमिकोत्तमगुणापूरिताऽस्ति। स वदति पितरम्–

**अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे।**
**सस्यमिव मर्त्यः पच्यते सस्यमिवजायते पुनः**[१२]।।१.१.६

अत्रायमाशयः– असाधुमनुष्या एव असत्यमाचरन्ति। असत्याचरणे सति न ते अमरा जायन्ते । अपितु इह लोकं परित्यज्य मरणधर्माणो मनुष्याः परलोकं यान्ति। श्रेष्ठपुरुषाणामाचरणेन तु तथैव ज्ञायते। अतोऽसत्यस्याचरणं न कर्त्तव्यमस्माभिः। यमस्य पार्श्वेऽवश्यं गन्तव्यमेति नचिकेतसा अवादि। नचिकेतसः सत्यनिष्ठा परिस्फुरति प्रसङ्गेऽस्मिन्। पितुर्वचनं सत्यम्भवत्वित्येवधिया यमं प्रति जगाम। तत्र यदा स प्रविशति पुनः अस्य धैर्यस्य परीक्षा प्रारब्धा । यमपुरे महाराजयमोऽनुपस्थितो बभूव। यदा यमः प्रत्यावर्तते गृहन्तदा , भार्यया समाचारं प्राप्य अतिथिं नचिकेतसं सत्करोति। प्रकृतप्रसङ्गे यमस्य भार्यावचनमुपादेयं विद्यते।

**वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्।**
**तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम्**[१३]।।१.१.७
**आशा प्रतीक्षे संगतं सूनृतां च,इष्टापूर्ते पुत्रपशूँश्च सर्वान्।**
**एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्मानश्नन् वसति ब्राह्मणो गृहे**[१४]।।१.१.८

एवं प्रकारेण भार्यायाः धर्मपूर्णवचनं श्रुत्वा विधिवन्नचिकेतसं सभाजयति।

**तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन्नतिथिर्नमस्यः।**
**नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व**[१५]।।१.१.९

वस्तुतोऽत्र सामाजिकशिक्षा प्राप्यते। इदानीमपि सामान्येनाचर्यते जनैरियं व्यवस्था। सत्कारेण सन्तुष्टस्सन् नचिकेता वरं ययाचे।

**शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि।**
**त्वप्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणो**[१६]**।।१.१.१०**

यमराज उवाद–

**यथा पुरस्ताद् भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः।**
**सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम्**[१७]**।।१.१.११**

पुनः स्वर्गे लोका सर्वदा आनन्दिता भवन्तीत्युक्त्वा आत्मानं श्रद्धालुरूपेण प्रकटीकृत्य द्वितीयवरं संयाचे। श्रद्धालवो ज्ञानप्राप्तयेऽधिकारिणो भवन्ति। अत एव नचिकेतसा प्रत्यपादि – **श्रद्धानाय मह्यमिति**[१८] । श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन न्यगादि–**श्रद्धावाँल्लभते ज्ञानमिति**[१९]।अत्रत्यविषयः छात्रेभ्योऽत्यन्तोपकारकः। यावच्छात्रेषु शिक्षणं शिक्षां प्रति च अनाग्रहस्तावच्छिक्षाऽपूर्णैव इति सर्वानुभवसिद्धान्तश्शिक्षकाणाम्। अतः छात्राः श्रद्धालवो भवेयुः शिक्षां प्रति, शिक्षकाऽपि शिक्षणाय समुचितवातावरणं निर्मेयुः। प्रकृतसन्दर्भे इयं शिक्षा आधुनिकच्छात्रावस्थां प्रति द्योतयति। ततश्च **विद्धि त्वमेतं निहितं गुहायामिति**[२०] कृत्वाऽग्निविद्यां यमस्तस्मै सम्प्रददौ। अग्निविद्यां संवर्ण्य आचार्यमस्तृतीयवरयाचनाय नचिकेतसमुत्साहयति। तृतीयो वरोऽत्यन्तगभीरत्वं सन्धार्योपस्थितो जातः। तदित्थम्–

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**
**एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः**[२१]**।। १.१.२०**

इदानीमात्मतत्त्वोपदेशक्रमः आगतः , परन्तु उपदेशोऽयमनधिकारिणे न दीयते इति विचिन्त्य यमः नचिकेतसं परीक्षते।

**देवैरत्रापि विचिकित्सितं पुरा , न हि सुविज्ञेयमणुरेष धर्मः।**
**अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम्**[२२]**।।१.१.२१**

काठिन्यमिदं श्रुत्वाऽपि धैर्यवान् प्रशस्तच्छात्ररूपो नचिकेता जगाद–

**देवैरत्रापि विचिकित्सं किल त्वं च मृत्यो यन्न सुविज्ञेयमात्थ।**
**वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित्**[२३]**।।१.१.२२**

इत्थं नचिकेतस उक्ते सति यमस्तं विमोहयति परीक्षणाय–

**शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्।**
**भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि**[२४]**।।१.१.२३**

एवम्प्रकारेण लोभनीयपदार्थान् वर्णयति यमाचार्यः नचिकेतसः पुरतः–

**ये ये कामा दुर्लभा** [२५] इति पद्येन। अन्ततो नचिकेता वदति–

**यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्।**
**योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते**[२६]**।।१.१.२९**

नचिकेतसः वचनं श्रुत्वा एष ब्रह्मविद्याया उत्तमाधिकारीति निश्चयः कृतः आचार्ययमेन। विद्याप्राप्तये नचिकेतसो धैर्यं प्रशंसार्हं प्रतिभाति। छात्राः एतादृशाः दृढनिश्चयवन्तस्स्युः लक्ष्यं प्रति। इयं शिक्षोद्भवत्यत्र। किञ्चाग्रे–**अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते**[२७]**, श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ**[२८] । इति पद्यद्वयेन ब्रह्मविद्यायाः महिमा

निगद्यते यमाचार्येण। ततश्च सत्यामावश्यकतायां गुरुभिः छात्राणामपि प्रशंसा कर्त्तव्येति शिक्षां ददात्युपनिषदियम्। अत्र यमेन कथ्यते।

**स त्वं प्रियान् प्रियरूपाँश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः।**
**नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः[२९]।। १.२.३**

एवं प्रकारेणनचिकेतसो धैर्यं, वैराग्यं, जिज्ञासां, विषयाधिकारित्वञ्च सम्परीक्ष्य आचार्य यमः करोति ब्रह्मोपदेशम्[३०]। एतावतालोडनेन ज्ञातं यत् समुचितशिक्षणवातावरणनिर्माणे कठोपनिषदः शिक्षा अधुनापि तदवस्थैवेति निश्चप्रचम्। शैक्षिकवातावरणे प्रयोक्तारः शिक्षका अनया शिक्षया छात्रान् सनाथयन्तु वर्धयन्त्विति कृते मे लघीयान् प्रयासः।

इति शिवम्।।

सन्दर्भाः–


१. वृ.धा .कु. पृ. १४८
२. अ. गुरोश्च हलः ३.३.१०६
३. औ. डि. पृ. ३७८
४. अ. म. १.६.४
५. उ. हि. पृ. १५१
६. शिक्षायाः दार्शनिकाधाराः इति ग्रन्थे
७. तथैव
८. कठ. १.२.१
९. कठ.
१० तत्रैव
११.तत्रैव
१२. तत्रैव
१३. तत्रैव
१४. तत्रैव
१५. तत्रैव
१६. तत्रैव
१७. तत्रैव
१८. तत्रैव. १.१.१३
१९. गी. ४.३९
२०. कठ.१.१.१४
२१. कठ.
२२. तत्रैव
२३. तत्रैव
२४. तत्रैव
२५. तत्रैव

२६. तत्रैव
२७. तत्रैव. १.२.१
२८.तत्रैव१.२.२
२९. तत्रैव. १.२.३
३०. तत्रैव.१.२.१६

सन्दर्भग्रन्था:–

१. अमरकोष:, पं. शिवदत्त, चौखम्बा कृष्णदास अकादमी, वाराणसी,२००२
२. अष्टाध्यायीसूत्रपाठ: , मिश्र डॉ रमाशङ्कर, मोतीलाल बनारसी दास ,
६. वृहद्धातुकुसुमाकर:, मिश्र पं. हरेकान्त:, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०११
४. उर्दु–हिन्दी शब्दकोश, अली डॉ. सैयद असद, सं. राजपाल एण्ड सन्ज,कश्मीरी गेट, दिल्ली, २००७
५. औक्सफोर्ड अंग्रेजी अंग्रेजी हिन्दी शब्दकोश. कुमार् डॉ. सुरेश,सहाइ डॉ. रमानाथ,औक्सफोड विश्वविद्यालय प्रेस २००९
६. वृहद्धातुकुसुमाकर:, मिश्र पं. हरेकान्त:, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०११
७. शिक्षाया: दार्शनिकाधारा:, दास सोमनाथ:,
८.श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुर